# गौरीदशकं

लीलालब्धस्थापितलुप्ताखिललोकां
लोकातीतैर्योगिभिरन्तश्चिरमृग्याम् ।
बालादित्य श्रेणिसमानद्युतिपुंजां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ 1

प्रत्याहारध्यानसमाधिस्थितिभाजां
नित्यं चित्ते निर्वृतिकाष्ठां कलयंतीम् ।
सत्यज्ञानानंदमयीं तां तनुरूपां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ 2

चंद्रापीडा नंदित मंदस्मितवक्त्रां
चंद्रापीडालंकृतनीलालक शोभाम् ।
इंद्रोपेंद्राद्यर्चितपादांबुजयुग्मां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ 3

आदिक्षांतामक्षरमूर्त्या विलसंतीं
भूते भूते भूतकदंबप्रसवित्रीम् ।
शब्दब्रह्मानंदमयीं तां तटिदाभां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ 4

© 2022 Vedam Nadam

मूलाधारादुत्थितवीथ्या विधिरंध्रं
सौरं चांद्रं व्याप्य विहारज्वलितांगीम् ।
येयं सूक्ष्मात्सूक्ष्मतनुस्तां सुखरूपां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ 5

नित्यः शुद्धो निष्कल एको जगदीशः
साक्षी यस्याः सर्गविधौ संहरणे च ।
विश्वत्राणक्रीडनलोलां शिवपत्नीं
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ 6

यस्याः कुक्षौ लीनमखंडं जगदंडं
भूयोभूयः प्रादुरभूदुत्थितमेव ।
पत्या सार्धं तां रजताद्रौ विहरंतीं
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ 7

यस्यामोतं प्रोतमशेषं मणिमाला
सूत्रे यद्वत् क्वापि चरं चाप्यचरं च ।
तामध्यात्मज्ञानपदव्या गमनीयां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ 8

© 2022 Vedam Nadam

नानाकारैः शक्तिकदम्बैर्भुवनानि
वाप्य स्वैरं क्रीडति येयं स्वयमेका ।
कल्याणीं तां कल्पलतामानतिभाजां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ 9

आशापाशक्लेशविनाशं विदधानां
पादाम्भोजध्यानपराणां पुरुषाणाम् ।
ईशामीशार्धांगहरां तामभिरामां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ 10

प्रातःकाले भावविशुद्धः प्रणिधाना-
द्भक्त्या नित्यं जल्पति गौरीदशकं यः ।
वाचां सिद्धिं संपदमग्र्यां शिवभक्तिं
तश्यावश्यं पर्वतपुत्री विदधाति ॥ 11

॥ इति श्रीमच्छंकरभगवतः कृतौ गौरीदशकं संपूर्णम् ॥

© 2022 Vedam Nadam